# ॥ गोपाल सहस्रनाम स्तोत्र ॥

पार्वत्युवाच-
कैलासशिखरे रम्ये गौरी पृच्छति शंकरम् ।
ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारकः ॥ १॥
त्वमेव पूज्यसेलौकै र्ब्रह्मविष्णुसुरादिभिः ।
नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वरः ॥ २॥
आश्चर्यमिदमत्यन्तं जायते मम शंकर ।
तत्प्राणेश महाप्राज्ञ संशयं छिन्धि शंकर ॥ ३॥
श्री महादेव उवाच-
धन्यासि कृतपुण्यासि पार्वति प्राणवल्लभे ।
रहस्यातिरहस्यं च यत्पृच्छसि वरानने ॥ ४॥
स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ ५॥
दत्ते च सिद्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत् ।
इदं रहस्यं परमं पुरूषार्थप्रदायकम् ॥ ६॥
धनरत्नौघमाणिक्यं तुरंगं गजादिकम् ।
ददाति स्मरणादेव महामोक्षप्रदायकम् ॥ ७॥
तत्तेऽहं संप्रवक्ष्यामि शृणुष्वावहिता प्रिये ।
योऽसौ निरंजनो देवश्चित्स्वरूपी जनार्दनः ॥ ८॥
संसारसागरोत्तारकारणाय सदा नृणाम् ।
श्रीरंगादिकरूपेण त्रैलोक्यं व्याप्य तिष्ठति ॥ ९॥
ततो लोका महामूढा विष्णुभक्तिविवर्जिताः ।
निश्चयं नाधिगच्छन्ति पुनर्नारायणो हरिः ॥ १०॥
निरंजनो निराकारो भक्तानां प्रीतिकामदः ।
वृदावनविहाराय गोपालं रूपमुद्वहन् ॥ ११॥
मुरलीवादनाधारी राधायै प्रीतिमावहन् ।
अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः ॥ १२॥
श्रीकृष्णचन्द्रो भगवान्नन्दगोपवरोद्यतः ।
धरिणीरूपिणी माता यशोदानन्ददायिनी ॥ १३॥
द्वाभ्यां प्रायाचितो नाथो देवक्यां वसुदेवतः ।
ब्रह्मणाऽभ्यर्थितो देवो देवैरपि सुरेश्वरि ॥ १४॥
जातोऽवन्यां मुकुन्दोऽपि मुरलीवेदरेचिका ।
तयासार्द्धं वचःकृत्वा ततो जातो महीतले ॥ १५॥

संसारसारसर्वस्वं श्यामलं महदुज्ज्वलम् ।
एतज्ज्योतिरहं वेद्यं चिन्तयामि सनातनम् ॥ १६ ॥
गौरतेजो बिना यस्तु श्यामतैजः समर्चयेत् ।
जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे ॥ १७ ॥
स ब्रह्महासुरापी च स्वर्णस्तेयी च पंचमः ।
एतैर्दोषैर्विलिप्ये तेजोभेदान्महेएश्वरि १८ ॥
तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम् ।
तस्मादिदं महादेवि गोपालेनैव भाषितम् ॥ १९ ॥
दुर्वाससो मुनेर्मोहे कार्तिक्यां रासमण्डले ।
ततः पृष्टवती राधा सन्देहं भेदमात्मनः ॥ २० ॥
निरंजनात्समुत्पन्नं मयाऽधीतं जगन्मयि ।
श्रीकृष्णेन ततः प्रोक्तं राधायै नारदाय च ॥ २१ ॥
ततो नारदतः सर्व विरला वैष्णवास्तथा ।
कलौ जानन्ति देवेशि गोपनीयं प्रयत्नतः ॥ २२ ॥
शठाय कृपणायाथ दाम्भिकाय सुरेश्वरि ।
ब्रह्महत्यामवाप्नोति तस्माद्यत्नेन गोपयेत् ॥ २३ ॥
पाठ करने की विधि
ॐ अस्य श्रीगोपालसहस्रनामस्तोत्रमन्त्रस्य श्रीनारद ऋषिः ।
अनुष्टुपछन्दः । श्रीगोपालो देवता । कामो बीजम् । माया शक्तिः ।
चन्द्रः कीलकम् श्रीकृष्णचन्द्र भक्तिरूपफलप्राप्तये
श्रीगोपालसहस्रनामस्तोत्रजपे विनियोगः ।
या इसतरह करें पाठ
ॐ ऐं क्लीं बीजम् । श्रीं ह्रीं शक्तिः । श्रीवृन्दावन
निवासः कीलकम् । श्रीराधाप्रियपरब्रह्मेति मन्त्रः ।
धर्मादिचतुर्विधपुरूषार्थसिद्ध्यर्थे जपे विनियोगः ॥
अथ करादिन्यासः
ॐ क्लां अंगुष्ठाभ्यां नमः ।
ॐ क्लीं तर्जनीभ्यां नमः ॥
ॐ क्लंऊ मध्यमाभ्यां नमः ॥
ॐ क्लैं अनामिकाभ्यां नमः ॥
क्लौं कनिष्ठिकाभ्यां नमः ॥
ॐ क्लः करतलकरपृष्ठाभ्यां नमः ॥
अथ हृदयादिन्यासः
ॐ क्लां हृदयाय नमः ।
ॐ क्लीं शिरसे स्वाहा ॥
ॐ क्लूं शिखायै वषट् ॥

ॐ क्लैं कवचाय हुम् ॥
ॐ क्लौं नेत्रत्रयाय वौषट् ॥
ॐ क्लः अस्त्राय फट् ॥
अथ ध्यानम्
कस्तूरी तिलकं ललाटपटले वक्षःस्थले कौस्तुभं
नासाग्रेवरमौक्तिकं करतले वेणुः करे कंकणम् ॥
सर्वांगे हरिचन्दनं सुललितं कण्ठे च मुक्तावली
गोपस्त्रीपरिवेष्टितोविजयते गोपालचूड़ामणिः ॥१॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं वर्हावतंसप्रियं
श्रीवत्सांकमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ॥
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं
गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे ॥२॥
सहस्रनाम स्तोत्र आरंभ-
ॐ क्लीं देवः कामदेवः कामबीजशिरोमणिः ।
श्रीगोपालो महीपालः सर्ववेदान्गपारगः ॥१॥
धरणीपालको धन्यः पुण्डरीकः सनातनः ।
गोपतिर्भूपतिः शास्ता प्रहर्ता विश्वतोमुखः ॥२॥
आदिकर्ता महाकर्ता महाकालः प्रतापवान् ।
जगज्जीवो जगद्धाता जगद्भर्ता जगद्वसुः ॥३॥
मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान् ।
नारायणो हृषीकेशो गोविन्दो गरूडध्वजः ॥४॥
गोकुलेन्द्रो महाचन्द्रः शर्वरीप्रियकारकः ।
कमलामुखलोलाक्षः पुण्डरीकशुभावहः ॥५॥
दुर्वासाः कपिलो भौमः सिन्धुसागरसंगमः ।
गोविन्दो गोपतिर्गोत्रः कालिन्दीप्रेमपूरकः ॥६॥
गोपस्वामी गोकुलेन्द्रो गोवर्धनवरप्रदः ।
नन्दादिगोकुलत्राता दाता दारिद्र्यभंजनः ॥७॥
सर्वमंगलदाता च सर्वकामप्रदायकः ।
आदिकर्ता महीभर्ता सर्वसागरसिन्धुजः ॥८॥
गजगामी गजोद्धारी कामी कामकलानिधिः ।
कलंकरहितश्चन्द्रो बिम्बास्यो बिम्बसत्तमः ॥९॥
मालाकारः कृपाकारः कोकिलास्वरभूषणः ।
रामो नीलाम्बरो देवो हली दुर्मदमर्दनः ॥१०॥
सहस्राक्षपुरीभेत्ता महामारीविनाशनः ।
शिवः शिवतमो भेत्ता बलारातिप्रपूजकः ॥११॥
कुमारीवरदायी च वरेण्यो मीनकैतनः ।

नरो नारायणो धीरो राधापतिरूदारधीः ॥ १२ ॥
श्रीपतिः श्रीनिधिः श्रीमान् मापतिः प्रतिराजहा ।
वृन्दापतिः कुलं ग्रामी धामी ब्रह्मसनातनः ॥ १३ ॥
रेवतीरमणो रामश्चंचलश्चारूलोचनः ।
रामायणशरीरोऽयं रामो रामःश्रियःपतिः ॥ १४ ॥
शर्वरः शर्वरी शर्वः सर्वत्र शुभदायकः ।
राधाऽऽराधयितोराधी राधाचित्तप्रमोदकः ॥ १५ ॥
राधारतिसुखोपेतो राधामोहनतत्परः ।
राधावशीकरो राधाहृदयाम्भोजषट्पदः ॥ १६ ॥
राधालिंगनसम्मोहो राधानर्तनकौतुकः ।
राधासंजातसम्प्रीतो राधाकामफलप्रदः ॥ १७ ॥
वृन्दापतिः कोकनिधिः कोकशोकविनाशकः ।
चन्द्रापतिश्चन्द्रपतिश्चण्डकोदण्डभंजनः ॥ १८ ॥
रामोदाशरथी रामोभृगुवंशसमुद्भवः ।
आत्मारामो जितक्रोधोमोहोमोहांधभंजनः ॥ १९ ॥
वृषभानुर्भवो भावः काश्यपिः करूणानिधिः ।
कोलाहलो हली हालीहली हलधरप्रियः ॥ २० ॥
राधामुखाब्जमार्तण्डो भास्करो रविजो विधुः ।
विधिर्विधाता वरूणो वारूणो वारूणीप्रियः ॥ २१ ॥
रोहिणीहृदयानन्दो वसुदेवात्मजो बली ।
नीलाम्बरो रौहिणेयो जरासंधवधोऽमलः ॥ २२ ॥
नागो नवाम्भो विरूदो वीरहावरदोबली ।
गोपथो विजयी विद्वान शिपिविष्टः सनातनः ॥ २३ ॥
परशुरामवचोग्राही वरग्राही शृगालहा ।
दमघोषोपदेष्टा च रथग्राही सुदर्शनः ॥ २४ ॥
वीरपत्नी यशस्त्राता जराव्याधिविघातकः ।
द्वारकावासतत्त्वज्ञो हुताशनवरप्रदः ॥ २५ ॥
यमुनावेगसंहारी नीलांबरधरः प्रभुः ।
विभुः शरासनो धन्वी गणेशो गणनायकः ॥ २६ ॥
लक्ष्मणो लक्षणो लक्ष्यो रक्षोवंशविनाशनः ।
वामनो वामनीभूतोऽवामनो वामनारूहः ॥ २७ ॥
यशोदानन्दनः कर्त्ता यमलार्जुनमुक्तिदः ।
उलूखली महामानी दामबद्धाह्वयी शमी ॥ २८ ॥
भक्तानुकारी भगवान केशवोऽचलधारकः ।
केशिहा मधुहा मोही वृषासुरविघातकः ॥ २९ ॥
अघासुरविनाशी च पूतनामोक्षदायकः ।

कुब्जाविनोदी भगवान् कंसमृत्युर्महामखी ॥ ३० ॥
अश्वमेधो वाजपेयो गोमेधो नरमेधवान् ।
कन्दर्पकोटिलावण्यश्चन्द्रकोटिसुशीतलः ॥ ३१ ॥
रविकोटिप्रतीकाशो वायुकोटिमहाबलः ।
ब्रह्मा ब्रह्माण्डकर्ता च कमलावांछितप्रदः ॥ ३२ ॥
कमली कमलाक्षश्च कमलामुखलोलुपः ।
कमलाव्रतधारी च कमलाभः पुरन्दरः ॥ ३३ ॥
सौभाग्याधिकचित्तोऽयं महामायी मदोत्कटः ।
तारकारिः सुरत्राता मारीचक्षोभकारकः ॥ ३४ ॥
विश्वामित्रप्रियोदांतोरामो राजीवलोचनः ।
लंकाधिपकुलध्वंसी विभीषण वरप्रदः ॥ ३५ ॥
सीतानन्दकरो रामो वीरो वारिधिबन्धनः ।
खरदूषणसंहारी साकेत पुरवासनः ॥ ३६ ॥
चन्द्रावलीपतिः कूलः केशिकंसवधोऽमरः ।
माधवो मधुहा मा ध्वीमाध्वीको माधवोमधुः ॥ ३७ ॥
मुंजाटवीगाहमानो धनुष्कारी धरात्मजः ।
वंशीवटविहारी च गोवर्धनवनाश्रयः ॥ ३८ ॥
तथा तालवनोद्देशी भांडरीवनशंखहा ।
तृणावर्तकथाकारी वृषभानुसुतापतिः ॥ ३९ ॥
राधाप्राणसमो राधावदनाब्जमधुव्रतः ।
गोपीरंजनदैवज्ञो लीलाकमलपूजितः ॥ ४० ॥
क्रीड़ाकमलसन्दोहो गोपिकाप्रीतिरंजनः ।
रंजको रंजनो रंगोरंगी रंगमहीरूहः ॥ ४१ ॥
कामः कामारिभक्तोऽयं पुराणपुरूषः कविः ।
नारदो देवलो भीमो बालो बालमुखाम्बुजः ॥ ४२ ॥
अम्बुजो ब्रह्मसाक्षी च योगी दत्तवरो मुनिः ।
ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः ॥ ४३ ॥
पद्मनाभः सुरज्येष्ठो ब्रह्मा रूद्रोऽहिभूषितः ।
गणानांत्राणकर्ता च गणेशो ग्रहिलो ग्रही ॥ ४४ ॥
गणाश्रयो गणाध्यक्षः क्रोडीकृतजगत्त्रयः ।
यादवेन्द्रो द्वारकेन्द्रो मथुरावल्लभो धुरी ॥ ४५ ॥
भ्रमरः कुन्तली कुन्तीसुतरक्षी महामखी ।
यमुनावरदाता च काश्यपस्य वरप्रदः ॥ ४६ ॥
शंखचूड़वधोद्दामो गोपीरक्षणतत्परः ।
पांचजन्यकरो रामो त्रिरामो वनजोजयः ॥ ४७ ॥
फाल्गुनः फाल्गुनसखो विराधवधकारकः ।

रूक्मिणीप्राणनाथश्च सत्यभामाप्रियंकरः ॥ ४८॥
कल्पवृक्षो महावृक्षो दानवृक्षो महाफलः ।
अंकुशो भूसुरो भामो भामको भ्रामको हरिः ॥ ४९॥
सरलः शाश्वतो वीरो यदुवंशी शिवात्मकः ।
प्रद्युम्नो बलकर्ता च प्रहर्ता दैत्यहा प्रभुः ॥ ५०॥
महाधनो महावीरो वनमालाविभूषणः ।
तुलसीदासशोभाढ्यो जालन्धरविनाशनः ॥ ५१॥
शूरः सूर्योमृतण्डश्च भास्करो विश्वपूजितः ।
रविस्तमोहा वह्निश्च वाडवो वडवानलः ॥ ५२॥
दैत्यदर्पविनाशी च गरूडो गरूडाग्रजः ।
गोपीनाथो महानाथो वृन्दानाथोऽवरोधकः ॥ ५३॥
प्रपंची पंचरूपश्च लतागुल्मश्च गोपतिः ।
गंगा च यमुनारूपो गोदावेत्रवती तथा ॥ ५४॥
कावेरी नर्मदा ताप्ती गण्डकी सरयूस्तथा ।
राजसस्तामसः सत्त्वी सर्वांगी सर्वलोचनः ॥ ५५॥
सुधामयोऽमृतमयो योगिनीवल्लभः शिवः ।
बुद्धो बुद्धिमतां श्रेष्ठो विष्णुर्जिष्णुः शचीपतिः ॥ ५६॥
वंशी वंशधरो लोको विलोको मोहनाशनः ।
रवरावो रवो रावो बालो बालबलाहकः ॥ ५७॥
शिवो रूद्रो नलो नीलो लांगुली लांगलाश्रयः ।
पारदः पावनो हंसो हंसारूढो जगत्पतिः ॥ ५८॥
मोहिनीमोहनो माया महामायी महामखी ।
वृषो वृषाकपिः कालः कालीदमनकारकः ॥ ५९॥
कुब्जाभाग्यप्रदो वीरो रजकक्षयकारकः ।
कोमलो वारूणो राजा जलजो जलधारकः ॥ ६०॥
हारकः सर्वपापघ्नः परमेष्ठी पितामहः ।
खंगधारी कृपाकारी राधारमणसुन्दरः ॥ ६१॥
द्वादशारण्यसम्भोगी शेषनागफणालयः ।
कामःश्यामःसुखःश्रीदः श्रीपतिः श्रीनिधिः कृति ६२॥
हरिर्हरो नरो नारो नरोत्तम इषुप्रियः ।
गोपालीचित्तहर्ता च कर्त्ता संसारतारकः ॥ ६३॥
आदिदेवो महादेवो गौरीगुरूरनाश्रयः ।
साधुर्माधुर्विधुर्धाता त्राताऽक्रूरपरायणः ॥ ६४॥
रोलम्बी च हयग्रीवो वानरारिर्वनाश्रयः ।
वनं वनी वनाध्यक्षो महावैद्यो महामुनिः ॥ ६५॥
स्यमन्तकमणिप्राज्ञो विज्ञो विघ्नविघातकः ।

गोवर्द्धनो वर्द्धनीयो वर्द्धनीवर्द्धनः प्रियः ॥ ६६ ॥
वर्द्धन्यो वर्द्धनो वर्द्धी वार्द्धिन्यः सुमुखप्रियः ।
वर्द्धितो वृद्धको वृद्धो वृन्दारकजनप्रियः ॥ ६७ ॥
गोपालरमणीभर्ता साम्बकुष्ठविनाशनः ।
रूक्मिणीहरणः प्रेम प्रेमी चन्द्रावलीपतिः ॥ ६८ ॥
श्रीकर्ता विश्वभर्ता च नरो नारायणो बली ।
गणो गणपतिश्चैव दत्तात्रेयो महामुनिः ॥ ६९ ॥
व्यासो नारायणो दिव्यो भव्यो भावुकधारकः ।
स्वश्रेयसं शिवं भद्रं भावुकंभविकं शुभम् ॥ ७० ॥
शुभात्मकः शुभः शास्ता प्रशास्ता मेघानादहा ।
ब्रह्मण्यदेवो दीनानामुद्धारकरणक्षमः ॥ ७१ ॥
कृष्णःकमलपत्राक्षः कृष्णः कमललोचनः ।
कृष्ण कामी सदा कृष्णः समस्तप्रियकारकः ॥ ७२ ॥
नन्दो नन्दो महानन्दी मादी मादनकःकिली ।
मिलीहिलीगिलीगोली गोलो गोलालयोऽगंली ॥ ७३ ॥
गुग्गुली मारकी शाखी वटः पिप्पलकः कृती ।
म्लेच्छहा कालहर्त्ता च यशोदायश एव च ॥ ७४ ॥
अच्युतः केशवो विष्णुर्हरिः सत्यो जनार्दनः ।
हंसो नारायणो नीलो लीनो भक्तपरायणः ॥ ७५ ॥
जानकी वल्लभो रामो विरामो विघ्ननाशनः ।
सहस्रांशुर्महाभानुर्वीरबाहुर्महोदधिः ॥ ७६ ॥
समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
गोकुलानन्दकारी च प्रतिज्ञापरिपालकः ॥ ७७ ॥
सदारामः कृपारामो महारामो धनुर्धरः ।
पर्वतः पर्वताकारो गयोगेयो द्विजप्रियः ॥ ७८ ॥
कम्बलाश्वतरो रामो रामायणप्रवर्तकः ।
द्यौर्दिवो दिवसो दिव्यो भव्यो भाविभयापहः ॥ ७९ ॥
पार्वतीभाग्यसहितो भ्राता लक्ष्मीविलासवान् ।
विलासी साहसी सर्वी गर्वी गर्वितलोचनः ॥ ८० ॥
मुरारिर्लोकधर्मज्ञो जीवनो जीवनान्तकः ।
यमो यमारिर्यमनो यामी यामविधायकः ॥ ८१ ॥
बंसुली पांसुली पांसुः पांडुरर्जुनवल्लभः ।
ललिताचंद्रिकामाली माली मालाम्बुजाश्रयः ॥ ८२ ॥
अम्बुजाक्षो महायक्षो दक्षश्चिन्तामणिः प्रभुः ।
मणिर्दिनमणिश्चैव केदारो बदरीश्रयः ॥ ८३ ॥
बदरीवनसम्प्रीतो व्यासः सत्यवतीसुतः ।

अमरारिनिहन्ता च सुधासिन्धुर्विधूदयः ॥ ८४॥
चन्द्रो रविः शिवः शूली चक्री चैव गदाधरः ।
श्रीकर्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥ ८५॥
श्रीपतिः पुण्डरीकाक्षः पद्मनाभो जगत्पतिः ।
वासुदेवोऽप्रमेयात्मा केशवो गरूडध्वजः ॥ ८६॥
नारायणः परं धाम देवदेवो महेश्वरः ।
चक्रपाणिः कलापूर्णो देवदेद्यो दयानिधिः ॥ ८७॥
भगवान्सर्वभूतेशो गोपालः सर्वपालकः ।
अनन्तो निर्गुणो नित्यो निर्विकल्पोनिरंजनः ॥ ८८॥
निराधारो निराकारो निराभासो निराश्रयः ।
पुरूषः प्रणवातीतो मुकुन्दः परमेश्वरः ॥ ८९॥
क्षणावनिः सार्वभौमो वैकुण्ठो भक्तवत्सलः ।
विष्णुर्दामोदरः कृष्णो माधवो मथुरापतिः ॥ ९०॥
देवकीगर्भसम्भूतो यशोदावत्सलो हरिः ।
शिवः संकर्षणः शम्भुभूतनाथो दिवस्पतिः ॥ ९१॥
अव्ययः सर्वधर्मज्ञो निर्मलो निरूपद्रवः ।
निर्वाणनायको नित्यो नीलजीमूतसन्निभः ॥ ९२॥
कलाक्षयश्च सर्वज्ञः कमलारूपतत्परः ।
हृषीकेशः पीतवासो वसुदेवप्रियात्मजः ॥ ९३॥
नन्दगोपकुमारार्यो नवनीताशनः प्रभुः ।
पुराणपुरूषः श्रेष्ठः शंखपाणिः सुविक्रमः ॥ ९४॥
अनिरूद्धश्चक्ररथः शांर्ग पाणिश्चतुर्भुजः ।
गदाधरःसुरार्तिघ्नो गोविन्दो नन्दकायुधः ॥ ९५॥
वृन्दावनचरः शौरिर्वेणुवाद्यविशारदः ।
तृणावर्तान्तको भीमः साहसो बहुविक्रमः ॥ ९६॥
शकटासुरसंहारी बकासुरविनाशनः ।
धेनुकासुरसंहारी पूतनारिर्नृकेसरी ॥ ९६॥
पितामहो गुरूः साक्षी प्रत्यगात्मा सदाशिवः ।
अप्रमेयः प्रभुः प्रज्ञोऽप्रतर्क्यः स्वप्नवर्द्धनः ॥ ९८॥
धन्योमान्यो भवोभावोधीरः शान्तो जगद्गुरूः ।
अन्तर्यामीश्वरो दिव्यो दैवज्ञो देवतागुरूः ॥ ९९॥
क्षीराब्धिशयनो धाता लक्ष्मीवांल्लक्ष्मणाग्रजः ।
धात्रीपतिरमेयात्मा चंद्रशेखरपूजितः ॥ १००॥
लोकसाक्षी जगच्चक्षुः पुण्यचारित्रकीर्तनः ।
कोटिमन्मथसौन्दर्यो जगन्मोहनविग्रहः ॥ १०१॥
मन्दस्मिततमो गोपो गोपिकापरिवेष्टितः ।

फुल्लारविन्दनयनश्चाणूरान्ध्रनिषूदनः ॥ १०२ ॥
इन्दीवरदलश्यामो बर्हिबर्हावतंसकः ।
मुरलीनिनदाह्लादो दिव्यमाल्याम्बराश्रयः ॥ १०३ ॥
सुकपोलयुगः सुभ्रूयुगलः सुललाटकः ।
कम्बुग्रीवो विशालाक्षो लक्ष्मीवांछुभलक्षणः ॥ १०४ ॥
पीनवक्षाश्चतुर्बाहुश्चतुर्मूर्तिस्त्रिविक्रमः ।
कलंकरहितः शुद्धो दुष्टशत्रुनिबर्हणः ॥ १०५ ॥
किरीटकुण्डलधरः कटकांगदमण्डितः ।
मुद्रिकाभरणोपेतः कटिसूत्रविराजितः ॥ १०६ ॥
मंजीररंजितपदः सर्वाभरणभूषितः ।
विन्यस्तपादयुगलो दिव्यमंगलविग्रहः ॥ १०७ ॥
गोपिकानयनानन्दः पूर्णचन्द्रनिभाननः ।
समस्तजगदानन्दः सुन्दरो लोकनन्दनः ॥ १०८ ॥
यमुनातीरसंचारी राधामन्मथवैभवः ।
गोपनारीप्रियो दान्तो गोपीवस्त्रापहारकः ॥ १०९ ॥
शृंगारमूर्तिः श्रीधामा तारको मूलकारणम् ।
सृष्टिसंरक्षणोपायः क्रूरासुरविभंजनः ॥ ११० ॥
नरकासुरसंहारी मुरारिर्वैरिमर्दनः ।
आदितेयप्रियो दैत्यभीकरश्चेन्दुशेखरः ॥ १११ ॥
जरासन्धकुलध्वंसी कंसारातिः सुविक्रमः ।
पुण्यश्लोकः कीर्तनीयो यादवेन्द्रो जगन्नुतः ॥ ११२ ॥
रूक्मिणीरमणः सत्यभामाजाम्बवतीप्रियः ।
मित्रविन्दानाग्नजितीलक्ष्मणासमुपासितः ॥ ११३ ॥
सुधाकरकुले जातोऽनन्तप्रबलविक्रमः ।
सर्वसौभाग्यसम्पन्नो द्वारकायामुपस्थितः ॥ ११४ ॥
भद्रासूर्यसुतानाथो लीलामानुषविग्रहः ।
सहस्रषोडशस्त्रीशो भागमोक्षैकदायकः ॥ ११५ ॥
वेदान्तवेद्यः संवेद्यो वैद्यो ब्रह्माण्डनायकः ।
गोवर्द्धनधरो नाथः सर्वजीवदयापरः ॥ ११६ ॥
मूर्तिमान् सर्वभूतात्मा आर्तत्राणपरायणः ।
सर्वज्ञः सर्वसुलभः सर्वशास्त्रविशारदः ॥ ११७ ॥
षड्गुणैश्वर्यसम्पन्नः पूर्णकामो धुरन्धरः ।
महानुभावः कैवल्यदायको लोकनायकः ॥ ११८ ॥
आदिमध्यान्तरहितस शुद्धसात्त्विकविग्रहः ।
असमानः समस्तात्मा शरणागतवत्सलः ॥ ११९ ॥
उत्पत्तिस्थितिसंहारकारणं सर्वकारणम् ।

गम्भीरः सर्वभावज्ञः सच्चिदानन्दविग्रहः ॥ १२० ॥
विष्वक्सेनः सत्यसन्धः सत्यवाक् सत्यविक्रमः ।
सत्यव्रतः सत्यरतः सर्वधर्मपरायणः ॥ १२१ ॥
आपन्नार्तिप्रशमनो द्रौपदीमानरक्षकः ।
कन्दर्पजनकः प्राज्ञो जगन्नाटकवैभवः ॥ १२२ ॥
भक्तिवश्यो गुणातीतः सर्वैश्वर्यप्रदायकः ।
दमघोषसुतद्वेषी बाणबाहु विखण्डनः ॥ १२३ ॥
भीष्मभक्तिप्रदो दिव्यः कौरवान्वयनाशनः ।
कौन्तेयप्रियबन्धुश्च पार्थस्यन्दनसारथिः ॥ १२४ ॥
नारसिंहो महावीरः स्तम्भजातो महाबलः ।
प्रह्लादवरदः सत्यो देवपूज्योऽभयंकरः ॥ १२५ ॥
उपेन्द्र इंद्रावरजो वामनो बलिबन्धनः ।
गजेन्द्रवरदः स्वामी सर्वदेवनमस्कृतः ॥ १२६ ॥
शेषपर्यंकशयनो वैनतेयरथो जयी ।
अव्याहतबलैश्वर्यसम्पन्नः पूर्णमानसः ॥ १२७ ॥
योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः ।
योगिहृत्पंकजावासो योगमाया समन्वितः ॥ १२८ ॥
नादबिन्दुकलातीतश्चतुर्वर्गफलप्रदः ।
सुषुम्नामार्गसंचारी देहस्यान्तरसंस्थितः ॥ १२९ ॥
देहेन्द्रियमनः प्राणसाक्षी चेतःप्रसादकः ।
सूक्ष्मः सर्वगतो देही ज्ञानदर्पणगोचरः ॥ १३० ॥
तत्त्वत्रयात्माको ऽव्यक्तः कुण्डली समुपाश्रितः ।
ब्रह्मण्यः सर्वधर्मज्ञः शान्तो दान्तो गतक्लमः ॥ १३१ ॥
श्रीनिवासः सदानन्दो विश्वमूर्तिर्महाप्रभुः ।
सहस्रशीर्षाः पुरूषः सहस्राक्षः सहस्रपात् ॥ १३२ ॥
समस्तभुवनाधारः समस्तप्राणरक्षकः ।
समस्तः सर्वभावज्ञो गोपिकाप्राणवल्लभः ॥ १३३ ॥
नित्योत्सवो नित्यसौख्यो नित्यश्रीर्नित्यमंगलः ।
व्यूहार्चितो जगन्नाथः श्रीवैकुण्ठपुराधिपः ॥ १३४ ॥
पूर्णानन्दघनीभूतो गोपवेषधरो हरिः ।
कलापकुसुमश्यामः कोमलः शान्तविग्रहः ॥ १३५ ॥
गोपांगनावृतोऽनन्तो वृन्दावनसमाश्रयः ।
वेणुवारदतः श्रेष्ठा देवानां हितकारकः ॥ १३६ ॥
बालक्रीडासमासक्तो नवनीतस्य तस्करः ।
गोपालकामिनीजारश्चौरजारशिखामणिः ॥ १३७ ॥
परंज्योतिः पराकाशः परावासः परस्फिउटः ।

अष्टादशाक्षरो मन्त्रो व्यापको लोकपावनः ॥ १३८ ॥
सप्तकोटिमहामन्त्रशेखरो देवशेखरः ।
विज्ञानज्ञानसन्धानस्तेजोराशिर्जगत्पतिः ॥ १३९ ॥
भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः ।
भक्तदारिद्र्यदमनो भक्तानां प्रीतिदायकः ॥ १४० ॥
भक्ताधीनमनाः पूज्यो भक्तलोकशिवंकरः ।
भक्ताभीष्टप्रदः सर्वभक्ताघौघनिकृन्तनः ॥ १४१ ॥
अपारकरूणासिन्धुर्भगवान्भक्ततत्परः ॥ १४२ ॥
॥ इति गोपाल सहस्रनामस्तोत्रम् संपूर्णम् ॥
॥ गोपालसहस्रनाम माहात्म्यम् ॥
स्मरणात्पापराशीनां खण्डनं मृत्युनाशनम् ।
वैष्णवानां प्रियकरं महारोगनिवारणम् ॥ १ ॥
ब्रह्महत्यासुरापानं परस्त्रीगमनं तथा ।
परद्रव्यापहरणं परद्वेषसमन्वितम् ॥ २ ॥
मानस वाचिकंकायं यत्पापं पापसम्भवम् ।
सहस्रनामपठनात्सर्वं नश्यति तत्क्षणात् ॥ ३ ॥
महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान् ।
कार्तिक्यां सम्पठेद्रात्रौ शतमष्टोत्तरं क्रमात् ॥ ४ ॥
पीताम्बरधरो धीमान्सुगन्धिपुष्पचन्दनैः ।
पुस्तकं पूजयित्वा तु नैवेद्यादिभिरेव च ॥ ५ ॥
राधाध्यानांकितो धीरो वनमालाविभूषितः ।
शतमष्टोत्तरं देवि पठेन्नामसहस्रकम् ॥ ६ ॥
चैत्रशुक्ले च कृष्णे च कुहूसंक्रान्तिवासरे ।
पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत् क्षणात् ॥ ७ ॥
तुलसीमालया युक्तो वैष्णवो भक्तितत्परः ।
रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे ॥ ८ ॥
ब्राह्मणं पूजयित्वा च भोजयित्वा विधानतः ।
पठेन्नामसहस्रंच ततः सिद्धिः प्रजायते ॥ ९ ॥
महानिशायां सततं वैष्णवो यः पठेत्सदा ।
देशान्तरगता लक्ष्मीः समायाति न संशयः ॥ १० ॥
त्रैलोक्ये च महादेवि सुन्दर्यः काममोहितः ।
मुग्धाः स्वयं समायान्ति वैष्णवंच भजन्ति ताः ॥ ११ ॥
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात् ।
गुर्विणी जनयेत्पुत्रं कन्यां विदन्ति सत्पतिम् ॥ १२ ॥
राजानो वश्यतां यान्ति किं पुनः क्षुद्रमानवाः ।
सहस्रनामश्रवणात्पठनात्पूजनात् प्रिये ॥ १३ ॥

धारणात्सर्वमाप्नोति वैष्णवो नात्र संशयः ।
वंशीवटे चान्यवटे तथा पिप्पलकेऽथवा ॥ १४ ॥
कदम्बपादपतले गोपालमूर्तिसन्निधौ ।
यः पठेद्वैष्णवो नित्यं स याति हरिमन्दिरम् ॥ १५ ॥
कृष्णेनोक्तंराधिकायै मया प्रोक्तं पुरा शिवे ।
नारदाय मया प्रोक्तं नारदेन प्रकाशितम् ॥ १६ ॥
मया त्वयि वरारोहे प्रोक्तमेतत्सुदुर्लभम् ।
गोपनीयं प्रयत्नेन न प्रकाश्यं कथंचन ॥ १७ ॥
शठाय पापिने चैव लम्पटाय विशेषतः ।
न दातव्यं न दातव्यं न दातव्यं कदाचन ॥ १८ ॥
देयं शिष्यायशान्ताय विष्णुभक्तिरताय च ।
गोदानब्रह्मयज्ञस्य वाजपेयशतस्य च ॥ १९ ॥
अश्वमेधसहस्रस्य फलं पाठे भवेद्ध्रुवम् ।
मोहनं स्तम्भनं चैव मारणोच्चाटनादिकम् ॥ २० ॥
यद्यद्वांछति चित्तेन तत्तत्प्राप्नोति वैष्णवः ।
एकादश्यां नरः स्नात्वा सुगन्धिद्रव्यतैलकैः ॥ २१ ॥
आहारंब्राह्मणं दत्त्वा दक्षिणां स्वर्णभूषणम् ।
ततः आरम्भकर्ताऽस्य सर्वं प्राप्नोति मानवः ॥ २२ ॥
शतावृत्तं सहस्रंच यः पठेद्वैष्णवो जनः ।
श्रीवृन्दावनचन्द्रस्य प्रसादात्सर्वमाप्नुयात् ॥ २३ ॥
यद्गृहे पुस्तकं देवि पूजितं चैव तिष्ठति ।
न मारी न च दुर्भिक्षं नोपसर्गभयं क्वचित् ॥ २४ ॥
सर्पादिभूतयक्षाद्या नश्यन्ति नात्र संशयः ।
श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा ॥ २५ ॥
गृहेयत्र सहस्रं च नाम्नांतिष्ठति पूजितम् ॥ २६ ॥
॥ इति श्रीसम्मोहनतन्त्रे पार्वतीश्वरसंवादे भाषानुवादसमन्वितं
गोपालसहस्रनाम माहात्म्यं सम्पूर्णम् ।
श्री गोपालसहस्रनाम शापविमोचन
ॐ अस्य श्रीगोपालसहस्रनाम शापविमोचन महामंत्रस्य वामदेवऋषि,
श्रीगोपालोदेवता, पंक्तिःछन्दः,
श्री सदाशिव वाक्य शापविमोचनार्थं जपे विनियोगः ।
ऋष्यादिन्यासः वामदेव ऋषये नमः शिरसि, गोपालो देवतायो नमो
हृदये । पंक्ति छंदसे नमो मुखे,
सदाशिव वाक्य शाप विमुक्तार्थे नमः सर्वांगे ॥
अथ करादिन्यासः
ॐ ऐं अंगुष्ठाभ्यां नमः ॥

ॐ क्लीं तर्जनीभ्यां नमः ॥
ॐ ह्रीं मध्यमाभ्यां नमः ॥
ॐ श्रीं अनामिकाभ्यां नमः ॥
ॐ वामदेवाय कनिष्ठिकाभ्यां नमः ॥
ॐ नमः स्वाहा करतलकर पृष्ठाभ्यां नमः ॥
अथ हृदयादिन्यासः
ॐ ऐं हृदयाय नमः ॥
ॐ क्लीं शिरसि स्वाहा ॥
ॐ ह्रीं शिखायै वषट् ॥
ॐ श्रीं कवचाय हुम् ॥
ॐ वामदेवाय नेत्रस्त्रयाय वौषट् ॥
ॐ नमः स्वाहा अस्त्राय फट् ॥
अथ ध्यानम्
ॐ ध्यायेद्देवं गुणातीतं पीत कौशेय वाससम् ।
प्रसन्नं चारूबदनंच निर्गुणं श्रीपतिं प्रभुम् ॥
मन्त्रः
ॐ ऐं क्लीं ह्रीं श्रीं वामदेवाय नमः (स्वाहा)।
(इस मंत्र का पाठ १०८ बार करें)

Visit http://www.webdunia.com for additional texts with Hindi meanings.

---

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001